# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **सत्रम् – 5** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 6 - CC - 3.5.10** | **समयः - 3 तः 6** |
| **दिनाङ्कः- 15/10/2019** | **संदर्भग्रन्थः –** महाभारते भीष्मपर्व - श्रीमद्भवद्गीतापर्व | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या । 10**

1. वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
   तथा शरीराणि विहाय जीर्णा न्यन्यानि संयाति नवानि देही ।।
2. न तथा बलवीर्याभ्यां जयन्ति विजिगीषवः ।
   यथा सत्यानृशंस्थाभ्यां धर्मेणैवोद्यमेन च ।।
3. अनन्ततेजा गोविन्दः शत्रुपुत्रेषु निर्व्यथ: ।
   पुरुषः सनातनमयो यतः कृष्णस्ततो जयः ।।

**प्र-2 अर्जुनेन कृता देव्याः स्तुतिं विलिख्य वरप्राप्तिकथाप्रसङ्गं पूर्वापरसन्दर्भेण सह लिखत । 10**

**अथवा**

**द्वयोः सेनयोः वर्णनं कुरुत ।**

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं संस्कृते व्याखा कार्या । 10**

1. मनुष्याणां सहस्त्रेषु कश्चिद्यतति सिद्धये ।
   यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ।।
2. उद्धरेदात्मनात्मनं नात्मानमवसादयेत् ।
   आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।।
3. श्रद्धावाँल्लभते ज्ञानं तत्पर: संयतेन्द्रिय: ।
   ज्ञानं लब्ध्वा परां शान्ति मचिरेणाधिगच्छति ॥

**प्र-4 साङ्ख्ययोगं विवर्ण्य आत्मसंयमयोगस्य प्रतिपाद्यविषयान् वर्णयत । 10**

**अथवा**

**कर्मयोगस्य वर्णनं कृत्वा गह्ना कर्मणो गतिः - विविच्यताम् ।**

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या । 10**

1. अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।।

2. उच्चैः श्रवसमश्वा विद्धि माममृतोऽद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ।।
3. निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्मविमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ।।

**प्र-6 त्रिविधाहारं, त्रिविधो यज्ञः त्रिविधं तपः त्रिविधं दानं स्पष्टयत। 10**

**अथवा**

**भगवतः विश्वरूपं विवर्ण्य भक्तियोगं वर्णयत।**

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत। 10**

1. महाभारतस्यापरं नाम किम्
2. महाभारते कति श्लोकाः
3. महाभारतस्य मुख्यः नायकः रसश्च कः
4. महाभारते कति पर्वाणि सन्ति
5. महाभारतस्य लेखकः कः
6. महाभारतं कस्मिन् युगे जातम्
7. गीतायां भगवान् कति श्लोकान् वदति
8. ऋतुषु भगवान् कः विभूति:
9. क्षेत्रज्ञः - शब्दस्य कोऽर्थः
10. मुनेः किं लक्षणम्
11. गीतायां भगवतः विश्वरूपं कौ पश्यतः
12. गीतायां कति श्लोकाः
13. महाभारते आहत्य कति गीताः सन्ति
14. महाभारतस्य प्रथमे द्वै आवृत्ती के
15. गीतायाः अन्तिमः श्लोकः कः

****************